श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ पञ्चसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चसप्ततितमः सर्गः ॥

## दशरथवाक्यमनाकर्ण्य परशुरामेण श्रीरामस्य वैष्णवधनुषि बाणं सन्धातुं प्रेरणम्

राम दाशरथे वीर वीर्यं ते श्रूयतेऽद्भुतम्।
धनुषो भेदनं चैव निखिलेन मया श्रुतम्॥ **1.75.1** ॥

तदद्भुतमचिन्त्यं च भेदनं धनुषस्तथा।
तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभम्॥ **1.75.2** ॥

तदिदं घोरसङ्काशं जामदग्न्यं महद्धनुः।
पूरयस्व शरेणैव स्वबलं दर्शयस्व च॥ **1.75.3** ॥

तदहं ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे।
द्वन्द्वयुद्धं प्रदास्यामि वीर्यश्लाघ्यमहं तव॥ **1.75.4** ॥

तस्य तद् वचनं श्रुत्वा राजा दशरथस्तदा।
विषण्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत्॥ **1.75.5** ॥

क्षत्ररोषात् प्रशान्तस्त्वं ब्राह्मणश्च महातपाः।
बालानां मम पुत्राणामभयं दातुमर्हसि॥ **1.75.6** ॥

भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनाम्।
सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवानसि॥ **1.75.7** ॥

स त्वं धर्मपरो भूत्वा कश्यपाय वसुन्धराम्।
दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ **1.75.8** ॥

मम सर्वविनाशाय सम्प्राप्तस्त्वं महामुने।
न चैकस्मिन् हते रामे सर्वे जीवामहे वयम् ॥ **1.75.9** ॥

ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान्।
अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ **1.75.10** ॥

इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते।
दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ **1.75.11** ॥

अनुसृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे।
त्रिपुरघ्नं नरश्रेष्ठ भग्नं काकुत्स्थ यत्त्वया ॥ **1.75.12** ॥

इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः।
तदिदं वैष्णवं राम धनुः परपुरञ्जयम् ॥ **1.75.13** ॥

समानसारं काकुत्स्थ रौद्रेण धनुषा त्विदम्।
तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम् ॥ **1.75.14** ॥

शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया।
अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ **1.75.15** ॥

विरोधं जनयामास तयोः सत्यवतां वरः।
विरोधे तु महद् युद्धमभवद् रोमहर्षणम् ॥ **1.75.16** ॥

शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः।
तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमम् ॥ **1.75.17** ॥

हुङ्कारेण महादेवः स्तम्भितोऽथ त्रिलोचनः।
देवैस्तदा समागम्य सर्षिसङ्घैः सचारणैः ॥ **1.75.18** ॥

याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ।
जृम्भितं तद् धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः॥ **1.75.19** ॥

अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तथा।
धनू रुद्रस्तु सङ्क्रुद्धो विदेहेषु महायशाः॥ **1.75.20** ॥

देवरातस्य राजर्षेर्ददौ हस्ते ससायकम्।
इदं च वैष्णवं राम धनुः परपुरञ्जयम्॥ **1.75.21** ॥

ऋचीके भार्गवे प्रादाद् विष्णुः स न्यासमुत्तमम्।
ऋचीकस्तु महातेजाः पुत्रस्याप्रतिकर्मणः॥ **1.75.22** ॥

पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः।
न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते॥ **1.75.23** ॥

अर्जुनो विदधे मृत्युं प्राकृतां बुद्धिमास्थितः।
वधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणम्।
क्षत्रमुत्सादयं रोषाज्जातं जातमनेकशः॥ **1.75.24** ॥

पृथिवीं चाखिलां प्राप्य कश्यपाय महात्मने।
यज्ञस्यान्तेऽददं राम दक्षिणां पुण्यकर्मणे॥ **1.75.25** ॥

दत्त्वा महेन्द्रनिलयस्तपोबलसमन्वितः।
श्रुत्वा तु धनुषो भेदं ततोऽहं द्रुतमागतः॥ **1.75.26** ॥

तदेवं वैष्णवं राम पितृपैतामहं महत्।
क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम्॥ **1.75.27** ॥

योजयस्व धनुःश्रेष्ठे शरं परपुरञ्जयम्।
यदि शक्तोऽसि काकुत्स्थ द्वन्द्वं दास्यामि ते ततः॥ **1.75.28** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे पञ्चसप्ततितमः सर्गः॥